# श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्यां प्रत्यायितः)

## केन्द्रीयसर्वकारस्य भारतीयभाषासमितेः आर्थिकसहायतया समायोज्यमाना शब्दशाला

**दिनाङ्कः - 08, 09, 10 / 02 / 2023**

गुजरातराज्यस्य श्रीप्रभासतीर्थस्य वेरावलनगरे वर्त्तमानप्रधानमन्त्रिणः श्रीमतः नरेन्द्रमोदीमहोदयस्य विकासयोजनासु शास्त्रविकासाय गुजरातसर्वकारद्वारा 2005 तमवर्षात् संस्थापितः अद्वितीयेन संस्कृतविश्वविद्यालयत्वेन श्रीसोमनाथस्य पुण्यभूमौ श्रीसोमनाथसंस्कृतविश्वविद्यालयः राराज्यते। अनेन संस्कृतप्रचारेण सह संस्कृतशास्त्राणां संरक्षणं भारतीयसंस्कृतेश्च सम्पोषणञ्चेक्रीयते। अस्मिन् विश्वविद्यालये शास्त्री (BA), आचार्यः (MA), विद्यावारिधिः (Ph.d.), PGDCA, पदविका (Diploma) इत्यादयः पाठ्यक्रमाः प्रचलन्ति। अस्य विश्वविद्यालयस्य अन्तर्गते एव गुजरातराज्यस्य ३८ महाविद्यालयाः, ०२ शिक्षाशास्त्रिमहाविद्यालयः, ०२ संशोधनकेन्द्रम्, ५८ डिप्लोमा केन्द्राणि, २१ PGDCA अभ्यासकेन्द्राणि च कार्यरतानि सन्ति। एवं विविधाः शैक्षिककार्यक्रमाः सहाभ्यासप्रवृत्तयश्चास्माभिः क्रियन्ते।

अत्र छात्राः आचार्यशास्त्रिकक्षासु षड् शास्त्राणि - व्याकरणम्, साहित्यम्, वेदः, ज्योतिषम्, दर्शनम्, पुराणेतिहासञ्च अधीयते। एतेषु अन्यतममस्ति - वेदाङ्गेषु मुखरूपेण विद्यमानं वेदार्थज्ञाने साक्षादुपकारकत्वात् प्राधान्यवद्व्याकरणम्। व्याकरणस्य अध्ययनाध्यापनं 2014 तमे वर्षे आरब्धम्। अस्मिन् विभागे आवर्षं छात्रोपकारकाः बहवः प्रकल्पाः परिसंवादाः सङ्गोष्ठ्याः कार्यशालाः विशिष्टव्याख्यानादयश्च समायोज्यन्ते। अस्मिन्नैव क्रमे राष्ट्रियशिक्षानीतिः 2020 इति आधृत्य भारतीयभाषाणां प्रचारप्रसाराय संवर्धनाय च सङ्घटितायाः **भारतीयभाषासमितेः** धनसाहाय्येन शब्दशालाख्या कार्यशाला समाचरिष्यते।

कार्यशालायामस्याम् अत्याधुनिकशब्दानां संस्कृतव्याकरणेन अनुवादस्य शब्दनिर्माणपद्धतेश्च प्रशिक्षणं दास्यते। अत्र राजनीति-चलचित्र-इलेक्ट्रोनिक-मीडिया-बैंक-चिकित्सा-यन्त्र-खाद्यपदार्थ-युद्धसामग्री-क्रीडासामग्री-मेकअपसामग्रीसम्बद्धानाम् अत्याधुनिशब्दानां संस्कृतभाषायां निर्माणपद्धतेः ध्यातव्यांशान् अध्यापयिष्यन्ति भाषाविदः वैयाकरणाः। अनया कार्यशालया डबलरोटी पिज्जा पनडुब्बी केक चेत्यादीनां शब्दानां संस्कृतानुवादयोग्यता सम्पादयिष्यते। तथा च संस्कृतभाषायाः अन्यासां भाषाणां मूलभूतत्वात् अन्यत्रापि भारतीयभाषासु एतेषाम् अत्याधुनिकशब्दानां संस्कृताधारितम् अनुवादं कर्त्तुं शक्ष्यते। तेन भारतीयभाषासु व्यापकतया अध्ययनाध्यापनं व्यवहारश्च राष्ट्रियशिक्षानीत्यनुसारं सिद्ध्यति। अस्याः कार्यशालायाः विवरणम् अधोनिर्दिष्टं वर्त्तते—

- ☞ दिनाङ्कः समयश्च - 08, 09, 10 / 02 / 2023, प्रातः 11.00 वादनात् सायं 5.30 वादनं यावत्।
- ☞ आयोजनस्थानम् - श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।
- ☞ निःशुल्कं पङ्जीकरणम्, निवासभोजनव्यवस्थापि निःशुल्का एव।
- ☞ भागगृहयालवः - आचार्यकक्षायाः छात्राः विद्यावारिधिच्छात्राः संस्कृताध्यापकाश्च।
- ☞ पङ्जीकरणसङ्केतः - https://forms.gle/z1Wjqj9T66XoVqDY8
- ☞ पङ्जीकरणाय अन्तिमदिनाङ्कः - 06 / 02 / 2023

सन्दर्भेऽस्मिन् अधिकमार्गदर्शनाय संयोजकयोः सम्पर्कं कर्त्तुं शक्यते।

**संयोजिका**

डॉ॰ विदुषी बोल्ला
सहायिकाचार्या
व्याकरणविभागः
दू॰स॰ - 9819118024
ई-मैल-सङ्केतः - vb4520@sssu.ac.in

**संयोजकः**

प्रो॰ विनोद कुमार झा
विभागाध्यक्षः
व्याकरणविभागः
दू॰स॰ - 9819118024
ई-मैल-सङ्केतः - vjha1973@gmail.com